## म्रियतेर्लुङ्लिङोश्च । (६१/२५३८)

'मृङ प्राणत्यागे' (धा.पा. १४०४)। ङित्त्वादात्मनेपदमत्र सिद्धमेव। [1]नियमार्थ[2]मिदं वचनम्। म्रियतेर्लुङ्लिङोः शितश्चात्मनेपदं भवति, अन्यत्र न भवति। अमृत। मृषीष्ट। शितः खल्वपि–म्रियते, [3]म्रियेते, म्रियन्ते। नियमः किमर्थः ? मरिष्यति। अमरिष्यत्[4]॥

## पूर्ववत् सनः। (६२/२७३४)

सनः पूर्वो यो धातुः आत्मनेपदी, [5]तद्वत् सन्नन्तादात्मनेपदं भवति। [6]येन निमित्तेन पूर्वस्मादात्मनेपदं विधीयते तेनैव सन्नन्तादपि भवति। '[7]अनुदात्तङित आत्मनेपदम्' (१. ३. १२/२१५७)[8]––आस्ते, [9]शेते। सन्नन्तादपि तदेव निमित्तम्–[10]आसिसिषते, शिशयिषते ( म. भा. १. २८८ )। 'नेर्विशः' (१. ३. १७/२६८३)––निविशते, निविविक्षते। 'आङ उद्गमने' (१.३.४०/२७१३)––आक्रमते, आचिक्रंसते।

[11]इह न भवति, शिशत्सति, मुमूर्षति। न हि शदिम्रियतिमात्रमात्मने[12]पदनिमित्तम्। किं तर्हि ? शिदाद्यपि, तच्चेह नास्ति। यस्य च पूर्वत्रैव निमित्तभावः प्रतिषिध्यते, तत् सन्नन्तेष्वप्यनिमित्तम्––अनुचिकीर्षति। [13]पराचिकीर्षति।

इह जुगुप्सते, मीमांसते इति ? [14]अनुदात्तङित इत्येव [15]सिद्धमात्मनेपदम् (१.३.१२/२१५७)। अवयवे कृतं लिङ्गं समुदायस्य विशेषकं भवति (म.भा. १. २८९) इति॥

## आम्प्रत्ययवत् कृञोऽनुप्रयोगस्य। (६३/२२४०)

अकर्त्रभिप्रायार्थोऽयमारम्भः। आम्प्रत्ययो यस्मात्[16] सोऽयमाम्प्रत्ययः। आम्प्रत्ययस्येव धातोः कृञोऽ[17]नुप्रयोगस्यात्मनेपदं भवति। ईक्षाञ्चक्रे। ईहाञ्चक्रे। यदि विध्यर्थमेतत्, तर्हि [18]उदुब्जाञ्चकार, उदुम्भाञ्चकार इति कर्त्रभिप्राये क्रियाफले आत्मनेपदं प्राप्नोति। [19]नैष दोषः। उभयमनेन क्रियते, विधिः नियमश्च। कथम्? पूर्ववत् इति वर्तते। [20]स द्वितीयो [21]यत्नो नियमार्थो भविष्यति। कृञः इति किम्? ईक्षामास। ईक्षाम्बभूव। कथं[22]पुनरस्यानुप्रयोगः यावता 'कृञ्चानुप्रयुज्यते लिटि' (३.१.४०/२२३९) इत्युच्यते? कृञ् इति प्रत्याहारग्रहणं तत्र विज्ञायते। क्व संनिविष्टानां प्रत्याहारः? 'अभूततद्भावे कृभ्वस्तियोगे[23] सम्पद्यकर्तरि च्विः' (५.४.५०/२११७) इति कृशब्दादारभ्य यावत् 'कृञो द्वितीयतृतीयशम्बबीजात् कृषौ' (५.४.५८/२१२९) इति [24]ञकारम्॥

## प्रोपाभ्यां युजेरयज्ञपात्रेषु। (६४/२५३)

'युजिर् योगे' (धा.पा. १४४५) स्वरितेत्। तस्य कर्त्रभिप्राये क्रियाफले सिद्धमेवात्मनेपदम्। अकर्त्रभिप्रायार्थोऽयमारम्भः। प्र उप इत्येवंपूर्वात् युजेरयज्ञ[25]पात्रप्रयोगविषयादात्मनेपदं भवति। प्रयुङ्क्ते। उपयुङ्क्ते। अयज्ञपात्रेषु इति किम्? 'द्वन्द्वं न्यञ्चि पात्राणि प्रयुनक्ति (देवसंयुक्तानि)' (आप.गृ.१.१.१६)।

---

1. इति इत्यधिकम् ब.इ.ग.ई. 2. तु इत्यधिकम् क, इदं नास्ति फ. वचनम् नास्ति अ. 3. म्रियेते नास्ति अ. 4. मुमूर्षति इत्यधिकम् फ. 5. तद्वान् ह. 6. येन. . .तेनैव नास्ति क. 7. अनु. . . .°नेपदम् नास्ति ड. 8. इति इत्यधिकम् फ. 9. वस्ते फ. 10. असिषते ब, विवसिषते फ. 11. पूर्ववत् सनः इति किम् इत्यधिकम् फ. 12. °पदस्य फ. 13. पराचिकीर्षति नास्ति फ. 14. अनुदात्तेत इत्येव अ.ब.ड. 15. सिद्धं नास्ति फ. 16. विहितः इत्यधिकम् क. 17. अनुप्रयुज्यमानस्य क. 18. उदुब्जा. . . .इति नास्ति ब.ड.फ. 19. नैष दोषः नास्ति फ.ह. 20. स नास्ति फ. 21. योगः फ. 22. पुनरनयोरप्रयोगः ड. फ. 23. इति इत्यधिकम् फ. 24. ञकारेण क, ञकारेण प्रत्याहारः फ, अनुप्रयोग इति किम्? चकार इत्यधिकम् फ. 25. °पात्रविषयात् क.फ.ह. 26. षट् पात्राणि अनुप्रयुनक्ति धीरः फ, धीरः क.ड.ह.